इह त्विष्टरसायत्ता रसवत्ता स्मृता गिराम्” । दण्डी ।

८७ रूपकम् “रूपकं रूपितारोपात् विषये निरपह्नवे । तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा” । तत्र “यस्य कस्यचिदारोपः परारोपणकारणम् । प्रत्येकं केवलं मालारूपञ्चेति चतुर्विधम्” सा० द० । तत्र श्लिष्टशब्द-निबन्धनं केवलपरम्परितं यथा । “आहवे जगदुद्दण्ड-राजमण्डलराहवे । श्रीन्टसिंह ! महीपाल ! स्वस्त्यस्तु तव बाहवे” ॥ अत्र राजमण्डलं न्टपसमूह एव चन्द्रबिम्ब मित्यारोपो राजबाहोराहुत्वारोपे निमित्तम् । तदेव माला रूपं यथा । “पद्मोदयदिनाधीशः सदागतिसमीरणः । भूभृदावलिदम्भोलिरेक एव भवान् भुवि” ॥ अत्र पद्माया उदय एव पद्मानामुदयः, सतामागतिरेव सदागमनं भूभृतो राजान एव पर्व्वता इत्याद्यारोपो राज्ञः सूर्य्यत्वारोपे निमित्तम् । अश्लिष्टशब्दनिबन्धनं केवलं यथा “पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः । त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः” । अत्र त्रैलोक्यस्य मण्डपत्वारोपो हरिबाहूनां स्तम्भत्वारोपे निमित्तम् । अश्लिष्टमालारूपं यथा । “मनोजराजस्य सितातपत्रं श्रीखण्डचित्रं हरिदङ्गनायाः । विराजति व्योमसरःसरोजं कर्पूरपूरप्रभमिन्दुबिम्बम्” अत्र मनो-जादेराजत्वाद्यारोपश्चन्द्रबिम्बस्य सितातपत्रत्वाद्यारोपे निमित्तम् । एषु च “राजभुजादीनां राहुत्वाद्यारोपो राजमण्डलत्वारोपे निमित्तमिति” केचित् । “अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् । समस्तवस्तुविष-यमेकदेशविवर्त्ति च” । तत्र “आरोप्याणामशेषाणां शाब्दत्वे प्रथमं मतम्” । प्रथमं समस्तवस्तुविषयं, यथा । “रावणावग्रहक्लान्तमिति वागमृतेन सः । अभिवृष्य मरु-च्छस्यं कृष्णमेघस्तिरोदधे” ॥ अत्र कृष्णस्य मेघत्वारोपे वागादीनाममृतत्वाद्यारोपितत्वम् । “यत्र कस्यचिदार्थत्वमेक-देशविवर्त्ति तत्” । कस्यचिदारोप्यमाणस्य । यथा । “लावण्य-मधुभिः पूर्णमास्यमस्या विकस्वरम् । लोकलोचनरोलम्ब-कदम्बैः कैर्न पीयते” ॥ अत्र लावण्यादौ मध्वाद्यारोपः शाब्दो मुखे पद्मत्वारोप आर्थः । न चेयमेकदेशविवर्त्ति-न्युपमा विकस्वरत्वधर्म्मस्यारोप्यमाणे पद्मे मुख्यतया वर्त्तनात् मुखे चोपचरितत्वात् । “निरङ्गं केवलस्यैव रूपणं तदपि द्विधा । माला केवलरूपत्वात्” तत्र मालारूपं निरङ्गं यथा । “निर्म्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम् । क्रीड़ागृहमनङ्गस्य सेयमिन्दीवरेक्षणा” ॥ केवलं यथा । “दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि ! नात्र दूये । उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रैर्य-च्छिद्यते मृदु पदं ननु सा व्यथा मे” ॥ “तेनाष्टौ रूपके भिदाः” । चिरन्तनैरुक्ता इति शेषः । क्वचित् परम्परित-मप्येकदेशविवर्त्ति यथा । “खड्गः क्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य” । अत्रार्थः क्ष्माया महिषी-त्वारोपः खड्गे सौविदल्लत्वारोपे हेतुः । अस्य भेदस्य पूर्व्ववन्मालारूपत्वेऽप्युदाहरणं मृग्यम् । “दृश्यन्ते क्वचिदा-रोप्याः श्लिष्टाः साङ्गेऽपि रूपके” । तत्रैकदेशविवर्त्ति श्लिष्टं यथा । “करमुदयमहीधरस्तनाग्रे गलिततमःपटलां-शुके निवेश्य । विकसितकुमुदेक्षणं विचुम्बत्ययममरेश-दिशो मुखं सुधांशुः” समस्तवस्तुविषयं यथा । अत्रैव “विचुम्बतीत्यादौ” “चुचुम्बे हरिदबलामुखमिन्दुनायकेन इति” पाठे । न चात्र श्लिष्टपरम्परितम् तत्र हि । “भूभृदावलिदम्भोलिरित्यादौ” राजादौ पर्वतत्वादिरूपणं विना वर्णनीयस्य राजादेर्दम्भोलितादिरूपणं सर्व्वथैव सादृश्यासम्भवादसङ्गतम् । तर्हि कथं “पद्मोदयदिनाधीश इत्यादौ” परम्परितं, राजादेः सूर्य्यादिना सादृश्यस्य तेजस्वितादिहेतुकस्य सम्भवादिति न वाच्यम् तथा हि राजादेस्तेजस्वितादिहेतुकं सुव्यक्तं सादृश्यं न तु प्रकृते तद्विवक्षितं पद्मोदयादेरेव द्वयोः साधारणधर्म्मतया विवक्षितत्वात्, इह तु महीधरादेः स्तनादिना सादृश्यं पीनोत्तुङ्गत्वादिना सुव्यक्तमेवेति न श्लिष्टपरम्परितम् । क्वचित् समासाभावेऽपि रूपकं दृश्यते । यथा । “मुखं तव कुरङ्गाक्षि ! सरोजमिति नान्यथा” । क्वचिद्वैयधिकर-ण्येऽपि । यथा । ‘विदधे मधुपश्रेणीमिह भ्रूलतया विधिः” । क्वचिद्वैधर्म्येऽपि यथा । ‘सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिर्गुणज्योत्स्नाकृष्णचतुर्द्दशी सरल-तायोगश्वपुच्छच्छटा । यैरेषापि दुराशया कलियुगे राजावली सेविता तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत् कौशलम्” ॥ अत्र च केषाञ्चिद्रूपकाणां शब्दश्लेष-मूलत्वेऽपि रूपकविशेषत्वादर्थालङ्कारमध्ये गणनम् । एवं वक्ष्यमाणालङ्कारेषु बोद्धव्यम् । “अधिकारूढ़वैशिष्ट्यं रूपकं यत्तदेव तत्” । तदेवाधिकारूढ़वैशिष्ट्यसञ्ज्ञ-रूपकम् । यथा । “इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः सुधाधाराधारश्चिरपरिणतं बिम्बमधरः । इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये तनुर्लावण्यानां जल-धिरवगाहे सुखतरः” ॥ कलङ्कराहित्यादिनाधिकम् ।